International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(5): 19-21
© 2016 IJSR
www.anantaajournal.com
Received: 08-07-2016
Accepted: 09-08-2016

डा. सुजाता राघवन्
Asst. Professor in Sahitya
Dept. of Sanskrit & IC
SCSVMV University
Enathur, Kanchipuram,
Tamilnadu, India

Correspondence
डा. सुजाता राघवन्
Asst. Professor in Sahitya
Dept. of Sanskrit & IC
SCSVMV University
Enathur, Kanchipuram,
Tamilnadu, India

# गीतगोविन्दकर्ताकाव्यस्यश्च सामान्यपरीचयः

**डा. सुजाता राघवन्**

**प्रस्तावना**

गीतागोविन्दकारेण जयदेवेन एत्काव्ये तस्य मातापितरौ नामानि उल्लेखः कृतः। यथा-

**श्रीभोजदेवप्रभवस्य रमेवीसुतश्रीजयदेवस्य।**
**पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु।।** (गीतगोविन्दे -१२.११)

अर्थात् जयदेवस्य पितुः नाम भोजदेवो भवति, मातुः नाम रमादेवी अथवा राधादेवी आसीत्।

**गीतगोविन्दे एकस्मिन्श्लोके यथा-**
**वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धि गिरो**
**जानीते जयदेव एव शरणः श्लाघ्यो दुरुहद्रुतेः।**
**श्रृङ्गारोत्तरशत्प्रबन्धरचनैराचार्यगोवर्धन-**
**स्पर्धो कोऽपि न विश्रुतः श्रृतिधरधोयीकविक्ष्मापतिः।।** (गीतगोविन्दे -१.४)

अस्मिन् श्लोकानुसारमुमापतिधरशरणं, गोविर्धनाचार्य, धोईकविराज इत्यादि जयेवस्य समालिककवयः आसन्। उक्तञ्च-

**किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन।** (गीतगोविन्दे -३.८.१०)

गीतगोविन्दकाव्यस्य अस्मिन् पद्ये गीतगोविन्दस्य रसिकप्रिया तथा रसमञ्जरीटीकानामानुसारेण गीतगोविन्दारस्य ग्रामं केन्दुबिल्व इति ज्ञायते।

जयदेवः श्रीकृष्णस्य भक्तः, साधुप्रकृति तथा महापुरुषरासीत्। भक्तमालाग्रन्थे ३९ सर्गात् आरभ्य ४१ सर्गपर्यन्तं विस्ताररूपेण चन्द्रदत्तकविना श्रीजयदेवस्य चरित्रविषये वर्णनं कृतम्। एतद् ग्रन्थानुसारं जयदेवः उत्कलप्रान्तस्य ब्राह्मणवशे जन्म अभवत्। विद्याभ्यासपरायण एषः कविः भगवतः जगन्नाथस्य अहर्निशं पूजा कृतवान्।

एकदा जयदेवकविना चिन्तितं स्वस्यगीतारचना माध्यमेन श्रीभगवतः प्रसन्नं कारयिष्यामि। तदनन्तरं सः गीतगोविन्दम् नामकं काव्यं निर्मितवान्। एतदनन्तरं समत्न्या साकं श्रीकृष्णस्य सम्मुखे नृत्यमपि कृतवान्। कदाचित् सः श्रीराधाकृष्णयोः रासचरितं निर्माणं कृतवान्। तच्चरिते श्रीकृष्णः राधां प्रति उक्तवान् यत् तस्य मस्तकोपि पादाः स्थापयतु इति। परन्तु भगवतः ऐश्वर्यस्वभावं स्मृत्वा श्रीराधा तथा न कृतवती।

एतदनन्तरं पुस्तकानि स्तपयित्वा यदा जयदेवः स्नानार्थं गतवान् तदा तस्य रूपं धारयित्वा स्वयं श्रीकृष्णः आगत्य पद्मावतीतः पुस्तकं नीत्वा जयदेवकवेः अभिप्रेतारथं विलिख्य पुनः अन्तर्ध्यानं जातम्।

एकदा गीतगोविन्दं श्रुत्वा तत्रत्यः राजा आसीत्। सः जयदेवेन प्रन्नीतगीतगोविन्दस्य गानं कृतवान् इतोऽपि अन्ये ये तेषां कृते तद् गीतगेविन्दस्य गानं तद्दिनतः कर्तुम् आदेशः दत्तवान्। राज्ञः गीतगोविन्दकाव्यस्य प्रचारं स्व नाम्ना कृतवान्। जयदेवविरचितगीतगोविन्दं श्रीजगन्नाथस्य प्रियतमं भवति। सः जयदेवविरचित गीतगोविन्दं श्रुत्वा एव प्रसन्नं भवति, न तु राज्ञ प्रणीगीतगोविन्दं श्रुत्वा अनन्तरं यदा राजा श्रीभगवतः पार्श्वे स्वस्य गीतगोविनदगानं दृष्ट्वान् तदा कोपं प्रदर्शितवान् परन्तु रात्रौ श्रीजगन्नाथः महाराजस्य स्वप्ने आगत्य तस्य कृते जयदेवेन विरचित गीतगोविन्दं स्वीकर्तुं उक्तवान्। तदननतरं सर्वे जयदेवेन विरचित गीतगोविन्दं स्वीकर्तुं उक्तवान्। तनन्तरं सर्वे जयदेवेन विरचित गीतगोविन्दस्य गानं कृतवन्तः।

**गीतगोविन्दकाव्यस्य सामान्यपरीचय**

बङ्गालदेशस्य राजा लक्ष्मणसेमस्याश्रितः महान् प्रतिभासम्पन्नः कविः श्रीजदेवः गीतगोविन्दम् इति नाम्ना एकं गीतकाव्यं प्रणयनं कृत्वा गीतकाव्यपरम्परायां स्वकीयं महत्वपूर्णस्थानमलञ्चकार। अस्मिन् काव्ये कविः श्रीराधाकृष्णयोः प्रेमस्वरूपस्य मवोज्ञवर्णनं कृतवान श्रृङ्गाररस्य, विप्रलम्भश्रृङ्गारस्य तथा सम्भोगश्रृङ्गारस्य चरमोत्कर्षता अत्र प्रदर्शिता। जयदेवकविना विप्रलम्भपरिपुष्टसम्भोगश्रृङ्गारस्य अधिकतया प्रयोगं कृतम।

सम्पूर्णग्रन्थः द्वादशसर्गात्मकं चत्वारिंशत्प्रबन्धविशिष्टञ्च भवति। गीतगोविन्दकाव्यस्य प्रख्यातव्याख्याकारः कुम्भकर्णनृपतिमते एतदूतग्रन्थे अष्टविंशति प्रबन्धाः सन्ति। प्रत्येक प्रबन्धे एका अष्टपदी सन्निवेशिता भवति।

प्रत्येक अष्टपद्यां प्रायः अष्टपद्यानां सन्निवेश कृतः कविना। कुन्तु प्रारम्भे कुञ्चित् अष्टद्यां पद्यानां संख्या अधिका दृश्यते। उदाहरणार्थं प्रथमाष्टपद्यां पद्यानां संख्या एकादश भवति। द्वतीयतः षष्ठाष्टपदीपस्यन्तं पद्यानां संख्या नव भवति। सप्तमाष्टपद्यां पद्यानां संख्या दश भवति। अष्टमाष्टद्यां पद्यानां संख्या नव भवति। किन्तु दशमाष्टपद्यां पद्यानां संख्या पञ्च अभवत्। इतः पूर्वं अष्टपद्यां पद्यानां संख्या अष्ट भवति स्म। श्रीजयदेवः गीतागोविन्दस्य विषयानुसारं प्रत्येकस्य सर्गस्य नामरणं चकार। यथा– प्रथमसर्गस्य नाम सामोददामोदरः, द्वितीयसर्गस्य नाम अक्लेशकेशवः, तृतीयसर्गस्य नाम मुग्धमधुसूदनः, चतुर्थसर्गस्य नाम स्निग्धमधुसूदनः, पञ्चमसर्गस्य नाम साकांक्षपुण्डरीकाक्षः, षष्टमस्य धन्यवैकुण्ठः, सप्तमसर्गस्य नाम नागरनाराणः, अष्टमसर्गस्य नाम विलक्ष्यलक्ष्मीपतिः, नवमसर्गस्य नाम मुग्धमुकुन्दः, दशमसर्गस्य नाम चतुरचतुर्भजः, एकादशसर्गस्य नाम सानन्ददामोदरः तथा अन्तिमद्वादशसर्गस्य नाम सुप्रीतपीताम्बरः इत।

एतेषां सर्वं सर्गाणां नामानि दृष्ट्वा ज्ञायते यत् कविना समस्तसर्गस्य नामानि भगवतः विभिमनोवस्थां दृष्ट्वा एव स्थापितम्। श्रीराधा श्रीकृष्णस्य प्रियतमा भवति, सा श्रीकृष्णस्य अनन्या प्रेयसी तथा मनस्थित्यां परिवर्तनस्य मूलं भवति।

गीतागोविन्दे प्रत्येकप्रबन्धस्य विषयः पृथक् पृथक् वर्तते। प्रथमप्रबन्धे भगवन् श्रीकृष्णस्य दशावतारविषये वर्णनं कृतं कविना। अत्रतः ज्ञायते श्रीकृष्णः दशावतारः धारणं कृतवान् इति।

द्वितीयसर्गस्य प्रारम्भः पञ्चमप्रबन्धात् भवति श्रीकृष्णस्य अनन्यप्रेयसि, श्रीराधास्वसखीद्वारा श्रीकृष्णस्य स्वेच्छाचारिताविषयं ज्ञात्वा विरहाग्निपीडायां व्यापुला जाता।

गीतागोविन्दकाव्यस्य षष्ठप्रवन्धः तृतीयसर्गस्य प्रारम्भे भवति। वसन्तऋतोः मधुवेलायां यदा श्रीभगवान् व्रजाङ्गनानां मध्ये आसीत्। तदा तस्य नित्यप्रेयसी श्रीराधा तत्समीपे नासीत् इति यदा ज्ञातं तदा तस्य आमोदः विषादरूपेण पिवर्तितः।

अष्टमप्रबन्धे श्रीराधायाः विप्रयोगे विषुण्णमुखस्य श्रीकृष्णस्य समीचीनां वर्णनं परिलक्ष्यते।

नवमप्रबन्धे सखी श्रीराधायाः विरहाग्निवर्णनं कृतवती। गीतागोविन्दस्य पञ्चमसर्गः दशमप्रबन्धस्य प्रारम्भे भवति। अस्मिन् सर्गे सखी सहायेन श्रीकृष्णः श्रीराधिकां प्रति मेलनार्थं निवेदनं कृतवान्। सखी अपि तदनुसारेण श्रीराधायाः समीपं गत्वा भगवतः अभिप्रायं प्रदर्शितवती।

एकादशप्रबन्धे सखी श्रीराधां श्रीकृष्णस्य प्रतीक्षास्थानां प्रति गन्तुं प्रेरितवती। गीतागोविन्दकाव्यस्य षष्ठसर्गस्य द्वदशप्रबन्धः प्रारम्भे भवति। अत्र सख्युः श्रीराधायाः विरहे तथा दुर्बला जाता इति कृष्णस्य समीपे तस्या विषये वर्णनं कृतम्।

सप्तमसर्गस्य प्रारम्भः त्रयोदशप्रबन्धे भवति। अत्र कविना चन्द्रोदये विरहिणीनायिकाश्रीराधायाः मानसिस्थितिविषये विशदवर्णनं कृतम्। गीतागोविन्दस्य चतुर्दशप्रबन्धे श्रीराधा सखीकृते वदति यत् अन्या कापि भगवान् श्रीकृष्णेन साकं रमणं करेति इति।

पञ्चदशषोडशप्रबन्धेपि श्रीराधा श्रीकृष्णस्य रमणीनायिकायाः स्वरूपम् अनुमानेन ज्ञातवती।

गीतागोविन्दकाव्यस्य अष्टमसर्गः सप्तदशप्रबन्धे प्रारम्भ्यते। अत्र सर्गे श्रीकृष्णः तथा तस्य नायिकाश्रीराधायाः वार्तालापविषये कविना वर्णनं कृतम। अस्मिन् सर्गे श्रीराधा श्रीकृष्णस्योपरि अभिमानं कथं प्रकारेण प्रदर्शयति तत्प्रदर्शितम्।

अष्टादशप्रबन्धे श्रीराधायाः सखी तस्याः कृते मानभङ्गं कृत्वा श्रीकृष्णेन सह वसन्तवेलायां सम्मेलनसुखम् अनुभवितुं प्रेरितवती।

गीतागोविन्दकाव्यस्य दशमसर्गः ऊनविंशप्रबन्धे प्रारम्भः भवति। अस्मिन् प्रबन् श्रीकृष्णः राधां प्रति कथं कामोत्सुक भावं प्रकटितवान् तथा सः कथं कामक्रीडायाः कृते श्रीराधां प्रति अनुरोधः कृतवान् तत्प्रदर्शितम्। एकादशसर्गस्य प्रारम्भः विंशतिप्रबन्धे भवति। अत्र श्रीराधायाः सखी श्रीराधां श्रीकृष्णन या क्षमा प्रार्थना कृता तच्श्रुत्वा क्षमापूर्वकं तेन सह मेलनं करोतु इति उक्तवती।

एकविंशप्रबन्धेऽपि सखीद्वारा श्रीराधा श्रीकृष्णं दृष्ट्वा लज्जापूर्वकं कामक्रीडाकर्तुं रतिनिकुञ्जमध्ये यत्र पूर्वे श्रीकृष्णरासीत् तत्र प्रवेशं कृतवती।

द्वाविंशत्प्रबन्धे रतिनिकुञ्जे प्रवेशान्तरं पूर्वे ये सखीगणाः यत्र आसन् सर्वे श्रीराधामाधवयोः सम्मेलने वाधा दातुमनिचछापूर्वकं तत्रतः केनापि उपायेन बहिरागताः। अनन्तरं श्रीराधामाधवयोः रतिक्रीडा वर्णिता।

गीतागोविन्दाव्यस्य अन्तिमद्वादशसर्गस्य प्रारम्भः त्रयोविंशप्रबन्धे भवति। अत्र श्रीराधामाधवयोः रतिक्रीडायां वाधा दत्तुं अनिच्छया सखीगणाः गतवत्यः। अनन्तरं तत्र प्रबन्धे कविना राधामाधवयोः रतियुक्तवार्तालापं वर्णनं कृतम।

चतुर्विंशतिप्रबन्धः गीतागोविन्दकाव्यस्य अन्तिमप्रबन्धो भवति। अस्मिन् प्रबन्धे मक्रीडानन्तरं कृष्णस्य कृते पुनः तस्या आभूषणं सज्जीकरोतु इति उक्तवती। एवं प्रकारेण कविना अत्र श्रीराधृष्णयोः श्रृङ्गारपूरणवार्त्तालापं वर्णनं कृतम्।

गीतागोविन्दः द्वादशसर्गात्मकं खण्डकाव्यम्। परन्तु सर्वथेदं काव्यकोटौ नायति यतोऽत्र चरितं न वर्णितम्। तथापि वर्णनापरकखण्डकाव्यत्वमस्य सिद्धयति। केचिदाधुनिकास्तु गीतागोविन्दं गीतानाट्यं मन्यन्ते। गीतागोविन्दं शुद्धगीतिकाव्यशुद्धनाट्ययोरन्तरे वर्तते, यद्यपीदं द्वादशशताब्द्यां निरमीयत, तथापीदं पक्वतामुपयास्यतो नाट्यस्याहरणस्वरूपता प्रथमं निदर्शनं मन्तव्यम्, एतादृशो परम्परा वङ्गेषु सम्प्रत्यपि जीवति, इदं शुद्धनाट्यस्यानुगामी इति अनुमातुं शक्यते यतोहि सम्वादोऽत्र नास्ति इति मैक्डोनेल महोदयः कथयन्ति।

गीतागोविन्दस्य द्वदशासर्गागीतमयसर्गाणां कथा परस्परं याजयितुं केचन श्लोका अपि सन्ति। सरसमधुरकवितायाः पराकाष्ठाऽत्र निदर्शता।

भक्तेः सरसकवितायाश्चौकत्र समावेशो यथा गीतागोविन्दे न तथा वित क्वापि अन्यत्रेति कथने नातिशयोरिति इति स्वयमुक्तं जयदेवेन। उक्तं हि तत्र

**यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्।**
**मधुरकोमकालपर्यन्तं श्रृणु तदा जयदेवसरस्वतीम्।।**

अपूर्वाणामुपमानामुत्प्रेक्षाणां च प्रयोगोऽत्र काव्ये विलक्षणं परिलक्ष्यते–

**वहति वलितविलोचनजलभरमानमलमुदारम्।**
**विधुमुव विकतविधुन्तुददन्तदलगलितामृतधारम्।।**

केचन विद्वांसोऽत्र ग्रन्थे गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली इत्यादि श्रृङ्गारप्रधानपद्यानि दृष्ट्वाऽश्लीलतां विदन्ति।

वस्तुतस्तु अत्र काव्ये श्रीकृष्णो नाम परमात्मतत्वं, गोपिकाश्च जीवतत्वानि, तयोर्मेलनमत्र विर्णितमिति। केचन गां पातीति गोपः शरीरम्, गोपि शरीरि आत्मा, पीनः पयोधरोऽज्ञानमेधो ज्ञानावश्यकत्वात् तस्य मर्दने करयुग सालम्बननिशलम्बनसामाधिरूपं प्रकाशनम् तच्छालीत्येवत्रिमर्थ कृत्वाऽस्याश्लीलतामपनुन्दति।

वयं तु पश्यामः श्रीकृष्णस्य गोपिभिः सह लौकिकी क्रीडा वर्णितास्तदाऽत्र काऽश्लीलता। कुमारसम्भवेऽष्टमे सर्गे, माघे एकादशादौ सर्गे, नैषधेऽष्टादशेऽन्यत्र च महाकाव्ये तत्र तत्र कामसूत्रमनुसृत्य वर्णिताः सम्भोगकाराः यदि क्षम्यन्ते तदाऽत्रत्यः

श्रृङ्गारः कथं न क्षम्यते। ये पुनः श्रृङ्गारकथामात्र एव कमपि विरसं गन्धमनुभवन्ति तेषां कथनमेव किं मूल्यं रक्षति?
गीतागोविन्दस्य प्रभावो न केवल मुत्तरभारतीय साहित्य प्रकट्यमुपलक्ष्यते। चण्डीदासविद्याहतिप्रभृतयस्तु कवयो गीतागोविन्दमुपजीव्यैव विश्ववन्द्यं पदमवापुः।
महाप्रभृशेचौतन्यदेवोऽस्य गीतागोविन्दस्य परम भक्तरासीत्। तच्छिष्यान्यतमो षोडशशताब्दीसम्भूतो राजा प्रतापरुद्रः उत्कलीय मन्दिरेषु गीतागोविन्दस्य नियमुतगानार्थं भूमानं कृतवान्।
अस्य ग्रन्थस्यानुकारे गीतगोपागीतागोपीपिप्रभृतयो बहवो ग्रन्था व्यश्चयन्। इत्यप्यस्य लोकप्रियत्वे प्रमाणम्।
अत्रत्यानि गीतानि रागालशुद्धानि परिष्कृतपदानि नितान्तमुधुराणि च–

**चिन्तयामि तदाननं कुटिलभ्रूरोषभरेण।**
**शोणपदममिवोपरि भ्रमताऽऽकुलं भ्रमरेण।।**
**निन्दति चन्दनमिन्दुकिरणमनुविदन्ति खेदमधीरम्।**
**व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्।।**

इत्यादीनि गीतानि सरसकवितायाः असामान्यानि निर्शनानि न केवल मेतत् गीतनिर्माणेऽपि पद्यनिर्माणेऽपि परा प्रौढारत्र प्रकाशिता।

**अत्रान्तरे च कुलटालवर्त्मपातसञ्जातापातक इव स्फुटलाञ्छनश्रीः वृन्दावनान्तरमदीपयदंशजालैदिकसुन्दरीवदनचन्दनबिन्दुरिन्दुः।। इति शम्**